Aśvaghoṣa's *Buddhacaritam*
Chapters One and Five

At the bottom of every page, there are one or two sets of notes.

The first set of notes contains new vocabulary appearing on the page. The line number of each new vocbulary item is given, followed by the new item. If a vocabulary item in the text has been encountered once before, the note at the bottom fo the page will refer you to the line where the item first appeared. Each vocbulary item is given a maximum of two times, the second time being a reference to the first occurrence.

The second set of notes give either grammatical information or information about the text or some item of Buddhist doctrine.

An English translation can be found after the two Sanskrit chapters. The translation refers both to the line numbers of the Sanskrit text and to the verse numbers of the chapter in question.

अश्वघोषविरचितम्

बुद्धचरितम्

भगवत्प्रसूतिः नाम प्रथमः सर्गः

इक्ष्वाकुवंशार्णवसम्प्रसूतः प्रेमाकरश्चन्द्र इव प्रजानाम् ।
शाक्येषु साकल्यगुणाधिवासः शुद्धोदनाख्यो नृपतिर्बभूव ॥ १ ॥

आसीन्महेन्द्रादिसमस्य तस्य पृथ्वीव गुर्वी महिषी नृपस्य
मायेतिनाम्नी शिवरत्नसारा शीलेन कान्त्याऽप्यधिदेवतैव ॥ २ ॥

देवैरभिप्रार्थ्यमनल्पभोगं सार्धं तयाऽसौ बुभुजे नृपालः ।
सा चाथ विद्येव समाधियुक्ता गर्भं दधे लोकहिताय सध्वी ॥ ३ ॥

पूर्वं तु सा चन्द्रमिवाभ्रमध्ये स्वप्ने ददर्शात्मवपुर्विशन्तम् ।
नागेन्द्रमेकं धवलं न धीरा तस्मान्निमित्ताद्बिभयाञ्चकार ॥ ४ ॥

वंशश्रियं गर्भगतां वहन्ती प्राचीव कल्ये विरराज रज्ञी ।
सा शोकमोहक्लमवर्जितापि घनं वनं गन्तुमियेष देवी ॥ ५ ॥

सा लुम्बनीनाम्नि वने मनोज्ञे ध्यानप्रदे देववनादनूने ।
वासेच्छया प्राह पतिं प्रतीता सत्त्वानिभं दोहदमामनन्ति ॥ ६ ॥

तस्या विदित्वा नृप आर्यभावं धर्म्यञ्च तुष्टः सुतरामनन्दत् ।
इच्छाविघातादहितं विशङ्क्य तत्प्रीतये चाशु विनिर्जगाम ॥ ७ ॥
तस्मिन्वने श्रीमति राजपत्नी प्रसूतिकालं समवेक्षमाणा ।

---

1. इक्ष्वाकुः Name of an ancestor of the Solar kings who ruled Ayodhyā; name of his descendants **1.** वंशः race. family, lineage **1.** अर्णवः ocean **1.** सम्प्रसूत begotten, brought forth, produced **1.** प्रेमन् love, affection, kindness, joy delight **1.** आकरः mine, rich source of anything **1.** चन्द्रः moon **1.** प्रजा offspring, progeny, descendants **2.** शाक्यः Name of the Buddha's family **2.** साकल्यम् whole or entirety of anything **2.** गुणः quality, virtue, excellence **2.** अधिवासः abode, residence, dwelling **2.** शुद्धोदनः Name of Buddha's father **2.** आख्या name, appellation **2.** नृपतिः king **3.** सम same, identical, equal **3.** पृथ्वी Earth; Queen Pṛthvī, the wife of Pṛthu, said in the Purāṇas to be the first king **3.** गुरु important, great, venerable, beloved **3.** महिषी a queen **3.** नृपः king **4.** माया Name of Buddha's mother **4.** नामन् name **4.** शिव auspicious, happy, lucky, prosperous **4.** रत्नम् gem, jewel, precious stone **4.** सार (at end of compound) best **4.** शीलम् disposition, character **4.** कान्तिः loveliness, beauty, lustre **4.** अधिदेवता a tutelary deity **5.** देवः god, deity, king, ruler **5.** अभिप्रार्थ्य desirable **5.** अनल्प not a little, not small **5.** भोगः enjoyment, pleasure **5.** सार्धम् with, together with (governs instr.) **5.** भुज् (7U) to enjoy **5.** नृपालः king **6.** विद्या knowledge, spiritual insight **6.** समाधिः concentration **6.** युक्त joined with **6.** गर्भः womb, belly; foetus, embryo, child; the act of conception **6.** धा (3U) to bear, hold, create, produce **6.** लोकः world, population, people **6.** हितम् benefit, well-being, welfare, good **6.** साधु good, virtuous, noble, pure **7.** पूर्वम् Formerly, beforehand **7.** चन्द्रः See line 1 **7.** अभ्रम् cloud, sky **7.** मध्यः middle, centre **7.** स्वप्नः sleep, dream **7.** दृश् (1P) to see **7.** आत्मन् self; character, mind, intellect **7.** वपुस् body **7.** विश् (6P) to enter, go into **8.** नागेन्द्र an elephant lord **8.** धवल white, handsome, pure **8.** धीर firm, steady **8.** निमित्तम् sign, omen **8.** भी (10P) to fear **15.** वनम् thicket, woodland, forest **15.** श्रीमत् brilliant, beautiful **15.** राजन् king **15.** पत्नी wife **15.** प्रसूतिः delivery, giving birth **15.** कालः time, proper time **15.** समवेक्ष् (सम्-अव-ईक्ष्) to perceive, observe, notice, expect, anticipate, hope

---

7. आत्मन् Used here as a reflexive pronoun: "her own" **8.** बिभयां चकार Periphrastic perfect of भी.

शय्यां वितानोपहितां प्रपेदे नारीसहस्रैरभिनन्द्यमाना ॥ ८ ॥

ततः प्रसन्नश्च बभूव पुष्यस्तस्याश्च देव्या व्रतसंस्कृतायाः ।
पार्श्वात्सुतो लोकहिताय जज्ञे निर्वेदनं चैव निरामयं च ॥ ९ (२५) ॥

ऊरोर्यथौर्वस्य पृथोश्च हस्तान्मान्धातुरिन्द्रप्रतिमस्य मूर्ध्नः ।
कक्षीवतश्चैव भुजांसदेशात्तथाविधं तस्य बभूव जन्म ॥ १० (२९) ॥

क्रमेण गर्भादभिनिःसृतः सन् बभौ च्युतः खादिव योन्यजातः ।
कल्पेष्वनेकेषु च भावितात्मा यः संप्रजानन्सुषुवे न मूढः ॥ ११ (३०) ॥

दीप्त्या च धैर्येण श्रिया रराज बालो रविर्भूमिमिवावतीर्णः ।
तथातिदीप्तो ऽपि निरीक्ष्यमाणो जहार चक्षूंषि यथा शशाङ्कः ॥ १२ (३१) ॥

स हि स्वगात्रप्रभयोज्ज्वलन्त्या दीपप्रभां भास्करवन्मुमोष ।
महार्हजाम्बूनदचारुवर्णो विद्योतयामास दिशश्च सर्वाः ॥ १३ (३२) ॥

अनाकुलान्यब्जसमुद्गतानि निष्पेषवन्त्यायतविक्रमाणि ।

---

21. च्युतः गतः C **22.** अनेकेषु च अनेकेष्विव C **23.** श्रिया च यो J **27.** अब्ज उब्ज J **27.** निष्पेषवन्त्यायत- निष्पेषवद्व्यायत- J

---

16. शय्या bed, couch **16.** वितानम् awning, canopy **16.** उपहित (उप - धा + क्त) covered, concealed **16.** नारी woman **16.** सहस्रम् a thousand, a large number **16.** अभिनन्द् to congratulate, welcome, applaud **17.** प्रसन्न clear, bright **17.** पुष्यः An asterism consisting of three stars; the eighth lunar mansion. **17.** देवी queen **17.** व्रतः solemn religious vow or devotional ritual **17.** संस्कृत cultivated, purified **18.** पार्श्वः the side of the body, the ribs **18.** सुतः offspring, son **18.** लोकः See line 6 **18.** हितम् See line 6 **18.** निर्वेदनम् *adv* without feeling, painlessly **18.** निरामयम् *adv* without damage or injury **19.** ऊरुः thigh **19.** और्वः (ऊरु + अण्) "born from the thigh"; Aurva (one of the ṛṣis, whose story is told in the Mahābhārata) **19.** पृथु broad, spacious; Pṛthu (name of the first king, after whom the earth Pṛthvī was named) **19.** हस्तः the hand **19.** मान्धातृ Māndhātṛ (name of a king of the Solar race, who according to Brahmanical legend was born from his own belly) **19.** प्रतिमा image, likeness, resemblance (at end of bahuvrīhi cmpds in sense of "like" or "equal to") **19.** मूर्धन् head **20.** कक्षीवत् Kakṣīvat (Name of a ṛṣi who composed many of the hymns of the Ṛgveda) **20.** भुजा arm **20.** अंसः part, portion, shoulder **20.** देश region (often used at end of compound without adding much meaning) **20.** जन्मन् birth **21.** क्रमः sequence, tradition, method **21.** गर्भः See line 6 **21.** अभिनिःसृत issued **21.** च्युत fallen **21.** खः sky **21.** योनिः the female reproductive system as a whole: vulva, vagina and uterus **21.** अजात not born **22.** कल्पः an æon; 1000 *yugas*, or 432 million years **22.** अनेक many **22.** भावित cultivated, especially through contemplation **22.** आत्मन् See line 7 **22.** मूढ confused, bewildered **23.** दीप्तिः brightness, brilliance **23.** धैर्य (धीर + ष्यञ्) strength, energy, steadiness, tenderness **23.** श्री beauty **23.** बाल young, immature, newly risen **23.** रविः the sun **23.** भूमिः the earth **23.** अवतीर्ण (अव - तॄ - क्त) to descend **24.** अतिदीप्त extremely luminous **24.** निरीक्ष् to gaze, look at **24.** चक्षुस् eye **24.** शशाङ्कः the moon **25.** गात्रम् body, limb, part of body **25.** प्रभा lustre, brilliance **25.** उज्ज्वलन्ती shining, radiant **25.** दीपः lamp, light **25.** भास्करः maker of light, the sun **26.** महार्ह having great cost, expensive, precious **26.** जाम्बूनदम् gold **26.** चारु pleasant, lovely, beautiful, elegant **26.** वर्णः colour, hue **27.** अनाकुल not perplexed, calm **27.** अब्जम् born in the water, a lotus **27.** समुद्गत having issued, arisen, been produced **27.** निष्पेषः the act of rubbing together, grinding, pounding, pulverizing **27.** आयत long, extended, mighty, powerful **27.** विक्रमः step, stride, pace

---

16. प्रपेदे Perfect ātmnepada of प्र - पद्, to approach **17.** बभूव Perfect of भू **18.** जज्ञे Perfect ātmanepada of जन्, to be born **20.** तथाविध like, of the same kind (correlative to यथा in verse 10a) **21.** बभौ Perfect of भा, to shine, appear **22.** संप्रजानन् Present participle of संप्रज्ञा, to be fully aware **22.** सुषुवे Perfect ātmanepada of सु, to go out **23.** रराज Perfect of राज् to shine, appear, resemble **24.** जहार Perfect of हृ, to carry, seize, capture, attract **25.** मुमोष Perfect of मुष् steal, rob, eclipse, surpass **26.** विद्योतयामास Periphrastic perfect of causative of विद्युत्, to shine, radiate, sparkle

तथैव धीराणि पदानि सप्त सप्तर्षितारासदृशो जगाम ॥ १४ (३३) ॥

बोधाय जातो ऽस्मि जगद्धितार्थमन्त्या तथोत्पत्तिरियं ममेति ।
चतुर्दिशं सिंहगतिर्विलोक्य वाणीं च भव्यार्थकरीमुवाच ॥ १५ (३४) ॥

खात्प्रस्रुते चन्द्रमरीचिशुभ्रे द्वे वारिधारे शिशिरोष्णवीर्ये ।
शरीरसौख्यार्थमनुत्तरस्य निपेततुर्मूर्धनि तस्य सौम्ये ॥ १६ (३५) ॥

श्रीमद्विताने कनकोज्ज्वलाङ्गे वैडूर्यपादे शयने शयानम् ।
यद्गौरवात्काञ्चनपद्महस्ता यक्षाधिपाः संपरिवार्य तस्थुः ॥ १७ (३६) ॥

मायातनूजस्य दिवौकसः खे यस्य प्रभावात्प्रणतैः शिरोभिः ।
आधारयन् पाण्डरमातपत्रं बोधाय जेपुः परमाशिषश्च ॥ १८ (३७) ॥

महोरगा धर्मविशेषतर्षाद्बुद्धेष्वतीतेषु कृताधिकाराः ।
यमव्यजन् भक्तिविशिष्टनेत्रा मन्दारपुष्पैः समवाकिरंश्च ॥ १९ (३८) ॥

तथागतोत्पादगुणेन तुष्टाः शुद्धाधिवासाश्च विशुद्धसत्त्वाः ।
देवा ननन्दुर्विगते ऽपि रागे मग्नस्य दुःखे जगतो हिताय ॥ २० (३९) ॥

यस्य प्रसूतौ गिरिराजकीला वाताहता नौरिव भूश्चचाल ।

---

29. तथोत्पत्तिर् भवोत्पत्तिर् J **32.** -सौख्यार्थमनुत्तरस्य -संस्पर्शसुखान्तराय J **41.** यस्य प्रसूतौ यस्मिन् प्रसूते C

---

28. धीर See line 8 **28.** पदम् foot, step **28.** सप्तर्षि Seven Ṛṣis, the constellation *Ursa major* **28.** तारा star **28.** सदृश like, similar to **29.** बोधिः awakening, enlightenment **29.** जात born **29.** जगत् world **29.** हित See line 000 **29.** अन्त्य final, last **29.** उत्पत्तिः birth **30.** सिंहः lion **30.** गतिः gait **30.** विलुक् (1A) to survey **30.** वाणिः speech, words **30.** भव्य lovely, good, excellent, true **30.** अर्थः meaning, sense **31.** खः See line 000 **31.** प्रस्रुत oozed, dripped, dropped **31.** मरीचिः ray or beam of light **31.** शुभ्र shining, bright **31.** वारि water **31.** धारः shower **31.** शिशिर cool, cold **31.** उष्ण warm, hot **31.** वीर्यम् power, strength **32.** शरीरम् body, person **32.** सौख्यम् pleasure **32.** अनुत्तर unsurpassed **32.** मूर्धन् See line 19 **32.** सौम्य handsome, lovely, gentle **33.** श्रीमत् See line 15 **33.** वितान See line 16 **33.** कनकम् gold **33.** उज्ज्वल bright, shining, luminous **33.** अङ्गम् part, accouterment, trapping **33.** वैडूर्यम् cat's-eye gem, quartz crystal **33.** पादम् foot **33.** शयनम् bed **34.** गौरवम् heaviness, respect, honour **34.** काञ्चन golden **34.** पद्मम् lotus **34.** हस्तम् See line 19 **34.** यक्षः a kind of divine spirit **34.** अधिपः lord, chief **34.** सम्परिवृ (10U) to surround, to encircle **35.** माया Name of the Buddha's mother **35.** तनू body **35.** दिवौकस् inhabitant of heaven, a god **35.** खः See line 000 **35.** प्रभावः dignity, majesty **35.** प्रणत bowed **35.** शिरस् head **36.** आधृ to hold up **36.** पाण्डर white **36.** आतपत्रम् umbrella **36.** परम supreme, highest **36.** आशी benediction, blessing, praise **37.** उरगः snake, serpent **37.** धर्मः virtue **37.** विशेष excellence **37.** तर्षः thirst **37.** अतीत past, of a former time **37.** अधिकारः superintendence, authority, prerogative, official duty, rule **38.** व्यज् to fan **38.** भक्तिः devotion **38.** विशिष्ट characterized by, possessing **38.** नेत्रम् eye **38.** मन्दारः the coral tree **38.** पुष्पम् blossom, flower **38.** समवकॄ to completely cover **39.** तथागतः one who is in this condition (epithet of Buddhas and Jinas) **39.** उत्पादः birth **39.** गुणः See line 2 **39.** तुष्ट pleased, gladdened **39.** शुद्ध pure **39.** अधिवासः See line 2 **39.** विशुद्ध purified **39.** सत्त्वम् intellect, mind, soul **40.** देवः celestial being, god, deity **40.** विगत gone away, dissipated **40.** रागः passion **40.** मग्न sunk down, buried **40.** दुःखम् sorrow, discontent, distress, pain, trouble, hardship **40.** जगत् See line 29 **40.** हित See line 18 **41.** प्रसूतिः See line 15 **41.** गिरिः mountain **41.** राजन् See line 15 **41.** कीलः tying post, pillar **41.** वातः wind **41.** आहत struck, beaten **41.** नौः (*fem.*) ship **41.** भूः earth

---

28. जगाम Perfect of गम्, to go **32.** निपेततुर् Perfect 3rd dual of निपत्, to fall **33.** शयान Present participle ātmanepada of शी, to recline, rest **34.** तस्थुः Perfect of स्था, to stand **36.** जेपुः Perfect of जप्, to mutter **40.** ननन्द Perfect of नन्द्, to rejoice, feel happy **41.** चचाल Perfect of चल्, to move, to shake

सचन्दना चोत्पलपद्मगर्भा पपात वृष्टिर्गगणादनभ्रात् ॥ २१ (४०) ॥

वाता ववुः स्पर्शसुखा मनोज्ञा दिव्यानि वासांस्यवपातयन्तः ।
सूर्यः स एवाभ्यधिकं चकाशे जज्वाल सौम्यार्चिरनीरितो ऽग्निः ॥ २२ (४१) ॥

प्रागुत्तरे चावसथप्रदेशे कूपः स्वयं प्रादुरभूत्सिताम्बुः ।
अन्तःपुराण्यागतविस्मयानि यस्मिन् क्रियास्तीर्थ इव प्रचक्रुः ॥ २३ (४२) ॥

धर्मार्थिभिर्भूतगणैश्च दिव्यैस्तद्दर्शनार्थं वनमापुपूरे ।
कौतूहलेनैव च पाद पैश्च प्रपूजयामास सगन्धपुष्पैः ॥ २४ (४३) ॥

---

47. वनमापुपूरे बलमाप पूरः C **48.** पैश्च प्रपूजयामास सगन्धपुष्पैः पेभ्यः पुष्पाण्यकालेऽपि J

---

42. चन्दनः sandalwood **42.** उत्पलम् blue lotus, water lily **42.** पद्मम् red lotus **42.** गर्भः inside, middle, interior; (at end of compound) full of **42.** वृष्टिः (*fem.*) rain, shower **42.** गगनम् sky **42.** अभ्रम् See line 7 **43.** वातः See line 000 **43.** स्पर्शः touch, contact, feeling, sensation **43.** सुख pleasant, sweet, charming, agreeable **43.** मनोज्ञ pleasing, lovely, agreeable, charming **43.** दिव्य divine, celestial, heavenly, splendid **43.** वासस् cloth, garment, curtain **43.** अवपत् to fall; (*causative*) to drop **44.** सूर्यः the sun **44.** अभ्यधिकम् extraordinarily, more than usual **44.** सौम्य See line 32 **44.** अर्चिस् (*neut.*) flame **44.** नीरित (नि - ईर् - क्त) agitated, stirred up **45–46.** तीर्थः pilgrimage site, sacred bathing place **45.** प्राच् east; उत्तर north; प्रागुत्तर northeast **45.** अवसथः dwelling, habitation **45.** प्रदेशः part, region **45.** कूपः a well **45.** स्वयम् by itself, spontaneously **45.** प्रादुर्भू to appear, arise **45.** सित white, pure **45.** अम्बुः water **46.** अन्तःपुरम् inner part of the palace, set aside as women's quarters; harem, seraglio; the women who dwell there **46.** विस्मयः surprise, wonder **46.** क्रिया purification ritual, ablution **47.** धर्मः religious merit **47.** अर्थिन् seeking **47.** भूतः ghost, goblin, spirit of a departed person **47.** गणः multitude, host, troop **47.** दिव्य See line 43 **47.** दर्शनम् seeing **47.** वनम् fountain, spring, water in general **47.** आपॄ to fill up **48.** कौतूहलः curiosity, eagerness **48.** पादपः tree, plant **48.** प्रपूज् to worship, honour; [with instrumental] to make an offering **48.** सगन्ध scented **48.** पुष्पम् See line 38

---

42. पपात Perfect of पत् **43.** ववुः Perfect of वा, to blow **44.** चकाशे Perfect of of काश्, to shine **44.** जज्वाल Perfect of ज्वल्, to burn, blaze

अश्वघोषविरचितम्

बुद्धचरितम्

अभिनिष्क्रमणं नाम पञ्चमः सर्गः

स तथा विषयैर्विलोभ्यमानः परमार्हैरपि शाक्यराजसूनुः ।
न जगाम रतिं न शर्म लेभे हृदये सिंह इवातिदिग्धविद्धः ॥ १॥

अथ मन्त्रिसुतैः क्षमैः कदाचित्सखिभिश्चित्रकथैः कृतानुयात्रः ।
वनभूमिदिदृक्षया शमेप्सुर्नरदेवानुमतो बहिः प्रतस्थे ॥ २॥

नवरुक्मखलीनकिङ्किणीकं प्रचलच्चामरचारुहेमभाण्डम् ।
अभिरुह्य स कण्ठकं सदश्वं प्रययौ केतुमिव द्रुमाब्जकेतुः ॥ ३॥

स निकृष्टतरां वनान्तभूमिं वनलोभाच्च ययौ महीगुणाच्च ।
सलिलोर्मिविकारसीरमार्गां वसुधां चैव ददर्श कृष्यमाणाम् ॥ ४॥

हलभिन्नविकीर्णशष्पदर्भां हतसूक्ष्मक्रिमिकाण्डजन्तुकीर्णाम् ।
समवेक्ष्य रसां तथाविधां तां स्वजनस्येव वधे भृशं शुशोच ॥ ५॥

कृषतः पुरुषांश्च वीक्षमाणः पवनार्कांशुरजोविभिन्नवर्णान् ।
वहनक्लमविक्लवांश्च धुर्यान् परमार्यः परमां कृपां चकार ॥ ६॥

---

49. परमार्हैर् J परमोहैर् C **50.** रतिं C धृतिं J **52.** बहिः J वहिः C **54.** कण्ठकं C कन्थकं J **55.** महीगुणाच्च J महीगुणेच्छुः C **57.** °क्रिमिकाण्ड° C °क्रिमिकीट° J **58.** वधे J बधे C

---

49. विषयः object of sense, sensible object **49.** विलुभ् to allure, entice **49.** परम highest, greatest, supreme, utter, best, most excellent **49.** अर्हः monetary value, price **49.** शाक्यः Name of tribe to which Gautama Buddha belonged **49.** राजन् king **49.** सूनुः son, offspring **50.** गम् to go; to know, experience **50.** रतिः pleasure, satisfaction **50.** शर्मन् pleasure, happiness **50.** लभ् to find, obtain **50.** हृदयम् heart **50.** सिंहः lion **50.** अतिदिग्ध smeared, poisoned **50.** विद्ध (व्यध् क्त) pierced **51.** अथ and **51.** मन्त्रिन् minister, counsellor **51.** सुतः son **51.** क्षम capable, suitable, friendly, worthy **51.** कदाचित् One time, on a certain occasion **51.** सखि friend, companion **51.** चित्र various **51.** कथा fable, story **51.** अनुयात्रम् retinue, train, attendant **52.** वनम् forest **52.** भूमिः ground, earth, land **52.** दिदृक्षा desire to see **52.** शमः peace, tranquillity **52.** ईप्सु desiring, longing for **52.** नरदेवः king **52.** अनुमत approved **52.** बहिर् outside **52.** प्रस्था to set out **53.** नव new **53.** रुक्मः gold **53.** खलीनः the bit of a bridle **53.** किङ्किणीका bell **53.** प्रचल् to wave **53.** चामरम् the tail of a yak used as a fly-whisk **53.** चारु beautiful **53.** हेमम् gold **53.** भाण्डम् fittings, harness of a horse **54.** अभिरुह् to mount **54.** सत् good **54.** अश्वः horse **54.** प्रया to go forth **54.** केतुः comet; chief, leader **54.** द्रुमाब्जम् The Karṇikāra tree **55.** निकृष्ट nearby **55.** वनम् See line 52 **55.** अन्तः skirt, boundary, border **55.** भूमिः See line 52 **55.** लोभः longing, desire **55.** या to go **55.** मही earth **55.** गुणः quality, characteristic, virtue, excellence **56.** सलिलम् water **56.** ऊर्मिः wave **56.** विकारः agitation, disturbance **56.** सीरः a plow **56.** मार्गः path, trail, track **56.** वसुधा earth (holder of wealth) **56.** दृश् to see **56.** कृष् to plow **57.** हलम् plow **57.** भिन्न broken **57.** विकीर्ण scattered **57.** शष्पः young grass **57.** दर्भः grass **57.** हत killed **57.** सूक्ष्म minute, tiny **57.** क्रिमिका insect **57.** अण्ड egg **57.** जन्तुः animal **57.** कीर्ण covered **58.** समवेक्ष् (सम् अव ईक्ष्) to observe **58.** रसा soil **58.** तथाविध in this condition, of such a nature **58.** स्वजनः kin, relative **58.** वधः slaughter **58.** भृशम् violently, extremely **58.** शुच् to grieve, to feel sorrow **59.** कृष् See line 56 **59.** पुरुषः man **59.** वीक्ष् to see, behold **59.** पवनः air, wind **59.** अर्कः the sun **59.** अंशुः ray, beam of light **59.** रजस् dust, dirt **59.** विभिन्न changed (for the worse), spoiled **59.** वर्णः colour, complexion **60.** वहनम् carrying, pulling **60.** क्लमः fatigue, exhaustion **60.** विक्लव overcome, overwhelmed **60.** धुर्यः beast of burden, draft **60.** आर्य noble **60.** परम See line 000 **60.** कृपा pity

अवतीर्य ततस्तुरङ्गपृष्ठाच्छनकैर्गां व्यचरच्छुचा परीतः।
जगतो जननव्ययं विचिन्वन् कृपणं खल्विदमित्युवाच चार्त्तः ॥ ७॥

मनसा च विविक्ततामभीप्सुः सुहृदस्ताननुयायिनो निवार्य।
अभितारलचारुपर्णवत्या विजने मूलमुपेयिवान् स जम्ब्वाः ॥ ८॥

निषसाद स यत्र शौचवत्यां भुवि वैदूर्यनिकाशशाद्वलायां।
जगतः प्रभवव्ययौ विचिन्वन्मनसश्च स्थितिमार्गमाललम्बे ॥ ९॥

समवाप्तमनःस्थितिश्च सद्यो विषयेच्छादिभिराधिभिश्च मुक्तः।
सवितर्कविचारमाप शान्तं प्रथमं ध्यानमनाश्रवप्रकारं ॥ १०॥

अधिगम्य ततो विवेकजं तु परमप्रीतिसुखं मनःसमाधिम्।
इदमेव ततः परं प्रदध्यौ मनसा लोकगतिं निशम्य सम्यक् ॥ ११॥

कृपणं बत यज्जनः स्वयं सन्नरसो व्याधिजराविनाशधर्मा।
जरयार्दितमातुरं मृतं वा परमज्ञो विजुगुप्सते मदान्धः ॥ १२॥

इह चेदहमीदृशः स्वयं सन् विजुगुप्सेय परं तथास्वभावं।
न भवेत्सदृशं हि तत्क्षमं वा परमं धर्ममिमं विजानतो मे ॥ १३॥

---

61. व्यचरच्छुचा J व्यचरत् शुचा C **62.** चार्तः J चार्त्तः C **64.** अभितारल° C अभितश्चल° J **65.** स यत्र शौचवत्यां J च पत्रखोरवत्यां C **65.** वैदूर्य° C वैडूर्य° J **66.** विचिन्वन्म° J विचिन्त्य म° C **68.** °मनाश्रव° C °मनास्रव° J **69.** मनःसमाधिम् J समाधिं C **70.** इदमेव J इममेव C **70.** निशम्य C निशाम्य J **71.** बत J वत C **71.** सन्नरसो C सन्नवेशो J **71.** °धर्मा J °धर्मः C

---

61. अवतॄ to descend **61.** तुरङ्गः (तुरम् swiftly गच्छति) horse **61.** पृष्ठम् the back **61.** शनकैस् slowly **61.** गो (गौः, गाम्, गवा, गवे, गोः, गोः, गवि) *fem.* the earth (*cf.* Greek γη, γαια) **61.** विचर् to wander, roam **61.** शुच् sorrow, grief **61.** परीत overcome **62.** जगत् world **62.** जननम् birth **62.** व्ययः loss, destruction, decay, downfall **62.** विचि (5U) reflect upon, think about **62.** कृपण pitiable, miserable **62.** खलु indeed, certainty **62.** वच् to say **62.** आर्त (आ ऋ क्त) afflicted, grieving **63.** मनस् mind, thought **63.** विविक्तता solitude **63.** अभीप्सु wishing for, desiring **63.** सुहृद् friend **63.** अनुयायिन् following, attending **63.** निवृ *causative* to turn away, to ward off **64.** अभितारल unsteady **64.** चारु See line 53 **64.** पर्णम् leaf **64.** विजनम् a solitary place **64.** मूलम् root **64.** उपेयिवस् one who has gone near or approached **64.** जम्बु *fem.* the rose apple tree **65.** निषद् (नि सद्) to sit down **65.** शौचवत् pure **65.** भु *fem.* earth **65.** वैदूर्यम् quartz crystal **65.** निकाशः appearance, resemblance **65.** शाद्वलः grass, lawn **66.** जगत् See line 62 **66.** प्रभवः birth **66.** व्ययः See line 62 **66.** विचि See line 62 **66.** मनस् See line 63 **66.** स्थितिः steadiness, stability **66.** मार्गः method (*cf.* line 56) **66.** आलम्ब् to resort to, take **67.** समवाप्त achieved, attained **67.** सद्यस् instantly, immediately **67.** विषयः See line 000 **67.** इच्छा desire **67.** आधिः mental pain, anxiety **67.** मुक्त released, freed **68.** वितर्कः (Buddhist technical term) stimulus: the initial turning of the attention to an object **68.** विचारः attention: the continued focus of thought upon an object **68.** आप् to obtain, attain, achieve **68.** प्रथम first **68.** शान्त calm **68.** ध्यानम् meditation **68.** आश्रवः fault **68.** प्रकारः manner, sort, variety, species **69.** अधिगम् acquire, get, secure; reach **69.** विवेकः (in Buddhist usage) solitude, seclusion **69.** प्रीतिः pleasure, delight, gratification **69.** सुख contentment **69.** समाधिः concentration **70.** प्रध्यै think, reflect, ponder **70.** लोकः world, people **70.** गतिः course **70.** निशम् to hear, learn; to see **70.** सम्यक् (*indecl.*) well, correctly, right **71.** कृपण petty, mean, contemptible **71.** बत alas! **71.** जनः people (*single in form, plural in meaning*) **71.** अरस weak, unhappy **71.** व्याधिः sickness, disease **71.** जरा old age **71.** विनाशः death **71.** धर्मन् characteristic, mark **72.** अर्दित afflicted **72.** आतुर hurt, diseased, disabled **72.** मृत dead **72.** अज्ञ unwise, foolish, silly, stupid **72.** विजुगुप्सते (*desiderative of* वि गुप्, to guard, protect, hide) despise, shun, detest **72.** मदः intoxication, insanity, passion **72.** अन्ध blind **73.** इह here, in this world **73.** चेद् if, although **73.** ईदृश like this, of this kind **73.** तथास्वभाव having such a nature **74.** सदृश worthy, fitting, becoming **74.** क्षम appropriate, fit , proper **74.** धर्मः virtue **74.** विज्ञा to be aware of

इति तस्य विपश्यतो यथावज्जगतो व्याधिजराविपत्तिदोषान्।
बलयौवनजीवितप्रवृत्तो विजगामात्मगतो मदः क्षणेन ॥ १४ ॥

न जहर्ष न चापि चानुतेपे विचिकित्सां न ययौ न तन्द्रिनिद्रे।
न च कामगुणेषु संररञ्जे न च दिद्वेष परं न चावमेने ॥ १५ ॥

इति बुद्धिरियं च नीरजस्का ववृधे तस्य महात्मनो विशुद्धा।
पुरुषैरपरैरदृश्यमानः पुरुषश्चोपससर्प भिक्षुवेशः ॥ १६ ॥

नरदेवसुतस्तमभ्यपृच्छद्वद कोऽसीति शशंस सोऽथ तस्मै।
नरपुंगव जन्ममृत्युभीतः श्रमणः प्रव्रजितोऽस्मि मोक्षहेतोः ॥ १७ ॥

जगति क्षयधर्मके मुमुक्षुर्मृगयेऽहं शिवमक्षयं पदं तत्।
स्वजनेऽन्यजने च तुल्यबुद्धिर्विषयेभ्यो विनिवृत्तरागदोषः ॥ १८ ॥

निवसन् क्वचिदेव वृक्षमूले विजने वायतने गिरौ वने वा।
विचराम्यपरिग्रहको निराशः परमार्थाय यथोपपन्नभैक्षः ॥ १९ ॥

इति पश्यत एव राजसूनोरिदमुक्त्वा स नभः समुत्पपात।
स हि तद्वपुरन्यबुद्धदर्शी स्मृतये तस्य समेयिवान्दिवौकाः ॥ २० ॥

---

76. °प्रवृत्तो J °प्रवृत्तौ C **78.** च दिद्वेष C विदिद्वेष J **80.** °वेशः C °वेषः J **82.** नरपुंगव J स च पुंगव C **84.** स्वजनेऽन्यजने च तुल्य° J अजनोण्यजनैरतुल्य° C **86.** °भैक्षः J °भिक्षुः C **88.** °बुद्ध° J °बुद्धि° C

---

75. विपश् (Sanskritized Pali word) to see clearly **75. यथावत्** exactly, truly, accurately **75. विपत्तिः** death, destruction **75. दोषः** fault, danger, noxious quality **76. बलम्** strength, vigour **76. यौवनम्** youth **76. जीवितम्** life, lifespan, vitality **76. प्रवृत्त** begun, started, prompted **76. विगम्** to go away, vanish **76. आत्मन्** self **76. गत** (*at end of compound*) in, belonging to, with reference to **76. मदः** pride **76. क्षणम्** moment **77. हृष्** to be delighted, to rejoice **77. अनुतप्** (4A) to feel sorry, grieve **77. विचिकित्सा** hesitation, doubt **77. या** (with abstract noun) to go to a state, to become **77. तन्द्रिः** drowsiness **77. निद्रा** sleepiness, sloth **78. कामः** desirable object **78. गुणः** See line 55 **78. संरञ्ज्** to be pleased **78. द्विष्** to dislike, to hate **78. अवमन्** despise, condemn, have contempt for **79. बुद्धिः** (*fem.*) perception, understanding **79. नीरजस्क** without passion (रजस्) **79. वृध्** (1A) to grow, increase, continue, last **79. महात्मन्** magnanimous **79. विशुद्ध** pure, purified **80. पुरुषः** See line 59 **80. अपर** other **80. उपसृप्** to approach, draw near **80. भिक्षुः** beggar **80. वेशः** dress, clothing, apparel **81. नरदेवः** See line 52 **81. सुतः** See line 51 **81. अभिप्रच्छ्** to ask **81. वद्** say, tell **81. शंस्** to tell, to relate **82. नरः** man **82. पुंगवः** bull **82. जन्मन्** birth **82. मृत्युः** death **82. भीत** afraid **82. श्रमणः** ascetic **82. प्रव्रज्** to renounce the world **82. मोक्षः** liberation, freedom, escape **82. हेतुः** reason, purpose **83. क्षयः** decay, destruction, end **83. मुमुक्षुः** desiring liberation **83. मृग्** (10A) to seek, search for **83. शिव** happy **83. पदम्** place, situation **84. स्वजनः** See line 58 **84. तुल्य** equal, same **84. विनिवृत्त** ceased, ended **84. रागः** passion **84. दोषः** (in Buddhist usage, based on Pāḷi दोसो) anger, malice **85. निवस्** (1P) to live, dwell **85. वृक्षः** tree **85. मूलम्** See line 64 **85. विजनम्** See line 64 **85. आयतनम्** abode, home **85. गिरिः** mountain **86. विचर्** See line 61 **86. परिग्रहः** possessions, property, belongings **86. निराश** hopeless **86. उपपन्न** existing, presenting itself **86. भैक्षम्** alms, charity **87. राजन्** See line 000 **87. सूनुः** See line 000 **87. नभस्** (*neut.*) sky, atmosphere **87. समुत्पत्** to ascend, to jump **88. वपुस्** (*neuter*) form, figure, appearance **88. दर्शिन्** seeing **88. स्मृतिः** memory, recollection **88. समे** (सम् आ इ) to meet **88. दिवौकस्** inhabitant of heaven, god

---

87. पश्यत एव राजासूनोर् Genitive absolute constructions indicate surprise or what is contrary to wishes or expectations. **88. समेयिवस्** Reduplicated perfect participle of समे. This participle is formed from the 3rd plural active of the reduplicated perfect; the उर् termination is dropped, and वस् is added, often after an inserted इ. Thus the 3rd plural of इ is ईयुः. Removing the termination gives the participial base ईयि to which the affix वस् is added to yield ईयिवस्.

गगनं खगवद्गते च तस्मिन्नृवरः संजहृषे विसिस्मिये च।
उपलभ्य ततश्च धर्मसंज्ञामभिनिर्याणविधौ मतिं चकार ॥ २१॥

तत इन्द्रसमो जितेन्द्रियाश्वः प्रविविक्षुः पुरमश्वमारुरोह।
परिवारजनं त्ववेक्षमाणस्तत एवाभिमतं वनं न भेजे ॥ २२॥

स जरामरणक्षयं चिकीर्षुः वनवसाय मतिं स्मृतौ निधाय।
प्रविवेश पुनः पुरं न कामाद्वनभूमेरिव मण्डलं द्विपेन्द्रः ॥ २३॥

सुखिता बत निर्वृता च सा स्त्री पतिरीदृत्क्मिवायताक्ष यस्याः।
इति तं समुदीक्ष्य राजकन्या प्रविशन्तं पथि साञ्जलिर्जगाद ॥ २४॥

अथ घोषमिमं महाभ्रघोषः परिशुश्राव शमं परं च लेभे।
श्रुतवान्स हि निर्वृतेति शब्दं परिनिर्वाणविधौ मतिं चकार॥ २५॥

अथ काञ्चनशैलशृङ्गवर्ष्मा गजमेघर्षभबाहुनिस्वनाक्षः।
क्षयमक्षयधर्मजातरागः शशिसिंहाननविक्रमः प्रपेदे ॥ २६॥

मृगराजगतिस्ततोऽभ्यगच्छन्नृपतिं मन्त्रिगणैरुपास्यमानं।
समितौ मरुतामिव ज्वलन्तं मघवन्तं त्रिदिवे सनत्कुमारः॥ २७॥

प्रणिपत्य च साञ्जलिर्बभाषे दिश मह्यं नरदेव साध्वनुज्ञाम्।
परिविव्रजिषामि मोक्षहेतोर्नियतो ह्यस्य जनस्य विप्रयोगः ॥ २८॥

---

89. गगनं J गगणं C **91**. पुरम ° J परम ° C **91**. जितेन्द्रियाश्वः जितेन्द्रियश्च C **92**. परिवारजनं J परिवर्त्य जनं C **95**. बत J वत C **95**. पतिरीदृत्क्मिवायतक्ष C पतिरीदृक्ष इहायताक्ष J **98**. श्रुतवान्स J श्रुतवांश्च C **99**. °बाहु° °वाहु°

---

89. गगनम् sky **89**. खगः bird **89**. नृ human being, person **89**. वर best, finest, most beautiful **89**. संहृष् to be thrilled **89**. विस्मि to be astonished, surprised **90**. उपलभ् to perceive, understand, comprehend **90**. संज्ञा sign, token **90**. निर्याणम् death, dying, final emancipation **90**. विधिः accomplishment, doing **90**. मतिं कृ to set the mind to (*governs locative*) **91**. इन्द्रसम equal of Indra **91**. जित conquered **91**. इन्द्रियम् sense faculties **91**. अश्वः See line 54 **91**. प्रविविक्षु intending to enter **91**. पुरम् city **91**. आरुह् to mount, climb upon **92**. परिवारः retinue, followers **92**. जनः See line 71 **92**. अवेक्ष् to consider **92**. अभिमत longed for, dear, beloved **92**. भज् (1A) to choose, select, prefer **93**. क्षयः See line 83 **93**. मरणम् death **93**. चिकीर्षुः desiring to do **93**. वसः dwelling, living **93**. मतिः mind, heart, thought, intention, recollection **93**. स्मृतिः desire, wish (compare use on line 88) **93**. निधा to determine, resolve, fix the thoughts upon **94**. प्रविश् to enter into **94**. कामः desire, willingness (Compare use at 78) **94**. मण्डलम् group, herd **94**. द्विपः elephant **94**. इन्द्रः lord, ruler, king **95**. सुखित happy, blessed **95**. निर्वृत carefree, contented, happy **95**. स्त्री woman **95**. पतिः lord, master, husband **95**. ईदृक्ष See ईदृश line 73 **95**. आयत long **95**. अक्षः eye **96**. समुदीक्ष् to look up at **96**. कन्या daughter **96**. पथिन् road **96**. अञ्जलिः salute with palms together **96**. गद् to say, speak **97**. घोषः report, cry, sound **97**. अभ्रम् cloud **97**. परिश्रु to hear **97**. पर superior, highest **99**. काञ्चन golden **99**. शैलः mountain **99**. शृङ्गम् summit, top, peak **99**. वर्ष्मन् body, form **99**. गजः elephant **99**. मेघः cloud **99**. ऋषभः bull **99**. बाहुः arm **99**. निस्वनः voice **99**. अक्षः See line 95 **100**. क्षयः house, residence (Compare usage at line 83) **100**. जात born **100**. रागः interest (Compare usage at line 84) **100**. शशिन् moon **100**. सिंहः See line 000 **100**. आननम् face **100**. विक्रमः stride, gait **100**. प्रपद् to approach **101**. मृगः animal; °राजः lion **101**. गतिः gait **101**. अभिगम् to approach **101**. नृपतिः king **101**. मन्त्रिन् See line 51 **101**. गणः group **101**. उपास् to wait upon, to serve **102**. समितिः meeting, assembly **102**. मरुत् wind; god, deity **102**. ज्वल् to shine, to be brilliant **102**. मघवन् munificent (epithet of Indra) **102**. त्रिदिवम् heaven **102**. सनत्कुमारः Name of one of the four sons of Brahma **103**. प्रणिपत् to bow down, fall prostrate **103**. अञ्जलिः See line 96 **103**. भाष् (1A) to say, speak **103**. दिश् (6U) to grant, give **103**. साधु kind, well-disposed **103**. अनुज्ञा permission, consent **104**. परिव्रज् to go forth [from the domestic life to the homeless life]; to become a wanderer **104**. मोक्षः liberation **104**. हेतुः purpose **104**. नियत fixed, inevitable **104**. विप्रयोगः separation, dissociation

इति तस्य वचो निशम्य राजा करिणेवाभिहतो द्रुमश्चचाल।
कमलप्रतिमेऽञ्जलौ गृहीत्वा वचनं चेदमुवाच बाष्पकण्ठः ॥ २९॥

प्रतिसंहर तात बुद्धिमेतां न हि कालस्तव धर्मसंश्रयस्य।
वयसि प्रथमे मतौ चलायां बहुदोषां हि वदन्ति धर्मचर्याम् ॥ ३०॥

विषयेषु कुतूहलेन्द्रियस्य व्रतखेदेष्वसमर्थनिश्चयस्य।
तरुणस्य मनश्चलत्यरण्यादनभिज्ञस्य विशेषतो विवेके ॥ ३१॥

मम तु प्रियधर्म धर्मकालस्त्वयि लक्ष्मीमवसृज्य लक्ष्यभूते।
स्थिरविक्रम विक्रमेण धर्मस्तव हित्वा तु गुरुं भवेदधर्मः ॥ ३२॥

तदिदं व्यवसायमुत्सृज त्वं भव तावन्निरतो गृहस्थधर्मे।
पुरुषस्य वयःसुखानि भुक्त्वा रमणीयो हि तपोवनप्रवेशः ॥ ३३॥

इति वाक्यं निशम्य राज्ञः कलविङ्कस्वर उत्तरं बभाषे।
यदि मे प्रतिभूश्चतुर्षु राजन् भवसि त्वं न तपोवनं श्रयिष्ये ॥ ३४॥

न भवेन्मरणाय जीवितं मे विहरेत्स्वास्थ्यमिदं च मे न रोगः।
न च यौवनमाक्षिपेज्जरा मे न च संपत्तिमिमां हरेद्विपत्तिः ॥ ३५॥

इति दुर्लभमर्थमूचिवांसं तनयं वाक्यमुवाच शाक्यराजः।
त्यज बुद्धिमिमामतिप्रवृत्तामवहास्योऽतिमनोरथोऽक्रमश्च ॥ ३६॥

---

106. बाष्प° J वाष्प° C **110.** विवेके J ऽविवेकम् C **111.** लक्ष्य° C लक्ष्म° J **120.** इमामति° J इमां गति° C **120.** रथोऽक्रम J रथक्रम C

---

105. वचस् (*neut*) speech **105.** निशम् See line 70 **105.** करिन् elephant **105.** अभिहन् to strike, beat, thump **105.** द्रुमः tree **105.** चल् to move, shake **106.** कमलम् lotus **106.** प्रतिमा image, likeness, resemblance (at end of bahuvrīhi cmpds in sense of "like" or "equal to") **106.** ग्रह् to grab, take, grasp **106.** वचनम् speech **106.** वच् See line 62 **106.** बाष्पः tears **106.** कण्ठः throat; बाष्प° choked with tears **107.** प्रतिसंहृ retract, take back, give up **107.** तातः father (a term of affection for a child, pupil or a younger or socially inferior person) **107.** धर्मः religious life **107.** संश्रयः seeking shelter or refuge **108.** वयस् time of life, youth, prime of life **108.** मतिः See line 88 **108.** दोषः See line 75 **108.** चर्या practice **109.** कुतूहल eager **109.** इन्द्रियम् See line 91 **109.** व्रतः vow, promise, resolve **109.** खेदः fatigue, pain **109.** असमर्थ feeble **109.** निश्चयः resolve **110.** तरुणः a young man **110.** अरण्यम् wilderness **110.** अभिज्ञ having experience **110.** विशेषतस् especially **110.** विवेकः See line 69 **111.** लक्ष्मी prosperity, wealth **111.** अवसृज् leave, give up, abandon **111.** लक्ष्य main, principal **111.** भूतः son **112.** स्थिर steady, firm **112.** विक्रमः heroism, prowess **112.** हा to abandon **112.** गुरुः father, ancestors **112.** अधर्मः vice **113.** व्यवसायः determination **113.** उत्सृज् give up **113.** तावत् now, in the meanwhile **113.** निरत devoted to (governs locative) **113.** गृहस्थः householder **114.** वयस् See line 108 **114.** सुखम् pleasure (Compare usage at line 69) **114.** भुज् to enjoy **114.** रमणीय enjoyable **114.** तपस् penance; °वनम् penance-grove, a piece of land consecrated for the practice of religious austerities **115.** वाक्यम् speech, declaration **115.** कलविङ्कः sparrow **115.** स्वरः voice **115.** उत्तरम् reply, answer **115.** भाष् See line 103 **116.** प्रतिभूः guarantee, bail, bond **116.** श्रि to go to, approach for protection **117.** मरणम् See line 88 **117.** जीवितम् See line 76 **117.** विहृ to pass time, abide, live **117.** स्वास्थ्यम् health, well-being **117.** रोगः disease, illness **118.** यौवनम् youth **118.** आक्षिप् to interrupt **118.** संपत्तिः wealth, fortune **118.** हृ to rob, plunder, steal **118.** विपत्तिः calamity, misfortune **119.** दुर्लभ hard to get, reach or understand **119.** अर्थः wish, desire, aim, goal **119.** तनयः son **119.** वाक्यम् See line 115 **119.** शाक्यराजः See line 000 **120.** त्यज् give up, renounce, abandon, let go **120.** बुद्धिः (*fem.*) idea, notion (Compare usage at line 79) **120.** अतिप्रवृत्त farfetched, excessive, extreme **120.** अवहास्य ridiculous, laughable **120.** अतिमनोरथ excessive desire, a desire for too much **120.** अक्रम out of order, improper, immodest

---

119. ऊचिवस् Participle of the reduplicated perfect of वच्.

अथ मेरुगुरुर्गुरुं बभाषे यदि नास्ति क्रम एष नास्मि वार्यः।
शरणाज्ज्वलनेन दह्यमानान्न हि निश्चिक्रमिषुं क्षमं ग्रहीतुम् ॥ ३७॥

जगतश्च यदा ध्रुवो वियोगो ननु धर्माय वरं स्वयंवियोगः।
अवशं ननु विप्रयोजयेन्मामकृतस्वार्थमतृप्तमेव मृत्युः ॥ ३८॥

इति भूमिपतिर्निशम्य तस्य व्यवसायं तनयस्य निर्मुमुक्षोः।
अभिधाय न यास्यतीति भूयो विदधे रक्षणमुत्तमांश्च कामान् ॥ ३९॥

सचिवैस्तु निदर्शितो यथावद्बहुमानात्प्रणयाच्च शास्त्रपूर्वम्।
गुरुणा च निवारितोऽश्रुपातैः प्रविवेशावसथं ततः स शोचन् ॥ ४०॥

चलकुण्डलचुम्बिताननाभिर्घननिश्वासविकम्पितस्तनीभिः।
वनिताभिरधीरलोचनाभिर्मृगशावाभिरिवाभ्युदीक्ष्यमाणः ॥ ४१॥

स हि काञ्चनपर्वतावदातो हृदयोन्मादकरो वराङ्गनानाम्।
श्रवनाङ्गविलोचनात्मभावान् वचनस्पर्शवपुर्गुणैर्जहार ॥ ४२॥

विगते दिवसे ततो विमानं वपुषा सूर्य इव प्रदीप्यमानः।
तिमिरं विजिघांसुरात्मभासा रविरुद्यन्निव मेरुमारुरोह ॥ ४३॥

---

121. नास्मि J नास्ति C **122**. निश्चिक्रमिषुं C निश्चिक्रमिषुः J **123**. यदा J यथा C **123**. ननु J न तु C **123**. स्वयंवियोगः त्व् अयं वियोगः C

---

121. मेरुः name of a mythical mountain **121. गुरु** heavy, weighty, great, important, respectable, unassailable **121. गुरुः** father, teacher, highly respected person **121. क्रमः** order, correct sequence, propriety **121. वार्य** that which ought to be restrained, hindered or obstructed **122. शरणम्** house **122. ज्वलनम्** fire, conflagration **122. दह्** to burn up, consume **122. निश्चिक्रमिषुः** one who wishes to exit **122. क्षम** suitable, proper **122. ग्रह्** to hold back **123. यदा** whereas, since, because, when **123. ध्रुव** steady, reliable, inevitable **123. वियोगः** separation, parting company, taking absence **123. ननु** Is it not the case that **123. धर्मः** See line 107 **123. वरम्** (indeclinable) better, preferable **124. अवश** necessary, certain **124. विप्रयुज्** to separate **124. अतृप्त** not pleased, unsatisfied **124. मृत्युः** See line 82 **125. व्यवसायः** See line 113 **125. तनयः** See line 119 **125. निर्मुमुक्षुः** wishing to become liberated **126. अभिधा** to say **126. या** See line 55 **126. भूयस्** more, greater, increased **126. विधा** to put, arrange for (second case) **126. रक्षणम्** custody, confinement **126. उत्तम** highest, best, most, finest **127. सचिवः** minister, counsellor, friend **127. निदृश्** (10) to show, point out, explain **127. यथावद्** appropriately **127. बहुमान** great respect **127. प्रणयः** courtesy, candour, straightforwardness **127. शास्त्रम्** order, command **128. निवृ** to avert, to prevent **128. अश्रु** tears **128. पातः** shedding, discharging **128. प्रविश्** See line 94 **128. अवसथः** dwelling place, living quarters **128. शुच्** See line 58 **129. चल** trembling **129. कुण्डलः** earring **129. चुम्ब्** to kiss **129. आननम्** See line 100 **129. घन** firm, hard, solid, deep, great, violent **129. निश्वासः** sighing **129. विकम्प्** to shake **129. स्तनः** breast **130. वनिता** woman, wife, mistress **130. अधीर** unsteady, excited **130. लोचनम्** eye **130. मृगः** See line 101 **130. शावः** fawn, cub, young of any animal **130. अभ्युदीक्ष्** look at, stare at **131. काञ्चन** See line 99 **131. पर्वतः** mountain **131. अवदात** beautiful, bright, pure **131. हृदयम्** See line 000 **131. उन्माद** intoxication **131. वर** See line 89 **131. अङ्गना** woman **132. श्रवनम्** ear **132. अङ्गम्** limb **132. विलोचनम्** eye **132. आत्मभावः** mind **132. वचनम्** speech **132. स्पर्शः** touch, caress **132. वपुस्** See line 88 **132. गुणः** virtue **132. हृ** captivate **133. विगम्** See line 76 **133. दिवसः** daytime **133. विमानः** palace **133. सूर्यः** the sun **133. प्रदीप्** (4Ā) to blaze, shine **134. तिमिरः** darkness **134. विहन्** to destroy **134. आत्मन्** See line 76 **134. भास्** (*feminine*) brilliance, shining, splendour **134. रविः** the sun **134. उदि** (2P) to rise **134. मेरुः** See line 121 **134. आरुह्** See line 91

---

132. आत्मभावः In classical Sanskrit usually means body, but in Pāḷi and Buddhist Sanskrit is used in sense of चित्त. **134. विजिघांसुः** Adjectival form derived from विजिघांसति, the desiderative stem of विहन्

कनकोज्ज्वलदीप्तदीपवृक्षं वरकालागुरुधूपपूर्णगर्भम्।
अधिरुह्य स वज्रभक्तिचित्रं प्रवरं काञ्चनमासनं सिषेवे ॥ ४४ ॥

तत उत्तममुत्तमाङ्गनास्तं निशि तूर्यैरुपतस्थुरिन्द्रकल्पम्।
हिमवच्छिरसीव चन्द्रगौरे द्रविणेन्द्रात्मजमप्सरोगणौघाः ॥ ४५ ॥

परमैरपि दिव्यतूर्यकल्पैः स तु तैर्नैव रतिं ययौ न हर्षम्।
परमार्थसुखाय तस्य साधोरभिनिश्चिक्रमिषा यतो न रेमे ॥ ४६ ॥

अथ तत्र सुरैस्तपोवरिष्ठैरकनिष्ठैर्व्यवसायमस्य बुद्धा।
युगपत्प्रमदाजनस्य निद्रा विहितासीद्विकृताश्च गात्रचेष्टाः ॥ ४७ ॥

अभवच्छयिता हि तत्र काचिद्विनिवेश्य प्रचले करे कपोलम्।
दयितामपि रुक्मपत्रचित्रां कुपितेवाङ्कगतां विहाय वीणाम् ॥ ४८ ॥

विबभौ करलग्नवेणुरन्या स्तनविस्रस्तसितांशुका शयाना।
ऋजुषट्पदपङ्क्तिजुष्टपद्मा जलफेनप्रहसत्तटा नदीव ॥ ४९ ॥

---

137. उत्तमाङ्गनास्तं J उत्तमाश् च नार्यो C

---

135. कनकम् gold **135**. उज्ज्वल bright, shining, luminous, splendid **135**. दीप् (4Ā) to shine, burn, glow **135**. दीपः a lamp, light **135**. वृक्षः See line 85; दीप° a lampstand, candelabra **135**. काल black **135**. अगुरु (*neut*) aloe wood **135**. धूपः incense **135**. पूर्ण (पूर् + क्त) filled **135**. गर्भः inner chamber, apartment **136**. अधिरुह् to climb, ascend **136**. वज्रः diamond **136**. भक्तिः decoration, ornament **136**. चित्र bright (compare usage at line 51) **136**. प्रवर chief, principal, best **136**. आसनम् seat **136**. सेव् take, betake, reside in **137**. उत्तम See line 126 **137**. अङ्गना See line 131 **137**. निश् night **137**. तूर्यः a kind of musical instrument **137**. उपस्था to wait upon, to attend **137**. कल्प [at end of compound] nearly equal to, only slightly inferior to **138**. हिमवत् snowy, icy [another name for the Himālayas, the mountain range north of India] **138**. शिरस् head, peak, summit, top **138**. चन्द्रः the moon **138**. गौरः the colour white **138**. द्रविणम् wealth **138**. इन्द्रः See line 94 **138**. आत्मजः son **138**. अप्सरस् Apsaras (a class of celestial deities, portrayed as wives of the Gandharvas) **138**. गणः See line 101 **138**. ओघः multitude **139**. दिव्य celestial, heavenly **139**. तूर्यः See line 137 **139**. कल्प See line 137 **139**. रतिः See line 000 **139**. या See line 77 **139**. हर्षः joy, delight, pleasure, satisfaction **140**. साधु virtuous, honourable, righteous, pious **140**. अभिनिश्क्रमिषा the desire to leave home **140**. रम् (1A) to become still, to rest **141**. सुरः god, deity **141**. तपस् See line 114 **141**. वरिष्ठ excellent, pre-eminent **141**. अकनिष्ठ elder, superior (literally, not smallest or youngest) **141**. बुध् to know, understand, perceive, notice, become aware of **142**. युगपद् all at once, all together, simultaneously **142**. प्रमदा a pretty young woman; °जन a young woman, a group of young women **142**. निद्रा See line 77 **142**. विधा to do, make, produce **142**. विकृत unnatural, deformed, loathsome, disgusting **142**. गात्रम् body **142**. चेष्टा gesture, motion, action **143**. शी to lie down, sleep, rest **143**. विनिविश् (causative) to place, insert **143**. प्रचल trembling, shaking **143**. करः a hand **143**. कपोलः a cheek **144**. दय् to love, like, be fond of **144**. रुक्मः See line 53 **144**. पत्रम् leaf, plate **144**. चित्र See line 136 **144**. कुप् to be angry **144**. अङ्कः the lap **144**. विहा to forsake, give up, abandon **144**. वीणा a vīṇā (a kind of stringed instrument) **145**. विभा to shine, appear, be visible **145**. करः See line 143 **145**. लग् to stick, adhere, touch **145**. वेणुः bamboo, flute **145**. स्तनः See line 129 **145**. विस्रस्त (विस्रंस, to slip down, become loosened + क्त) **145**. सित white **145**. अंशुकम् garment, apparel **145**. शी See line 143 **146**. ऋजु straight **146**. षट्पदः a bee **146**. पङ्क्तिः line, row **146**. जुष् to visit, inhabit **146**. पद्मम् red lotus **146**. जलम् water **146**. फेनः foam, froth **146**. प्रहस् to laugh, smile **146**. तट shore, beach **146**. नदी river

---

137. निश् Has no forms for प्रथमा विभक्ति or for the singular and dual of the द्वितीया विभक्ति; the remaining forms may optionally be used in place of the forms of निशा. **146**. The lotus is a stock metaphor for the folded hands. The straight bamboo flute in the hands is compared to a line of bees on a lotus. The woman's breasts are compared to the banks of a river, and her robes are compared to the white foam. In poetry, the colour white is often symbolized by the white teeth that show when one is smiling.

नवपुष्करगर्भकोमलाभ्यां तपनीयोज्ज्वलसंगताङ्गदाभ्याम्।
स्वपिति स्म तथापरा भुजाभ्यां परिरभ्य प्रियवन्मृदङ्गमेव ॥ ५० ॥

नवहाटकभूषणास्तथान्या वसनं पीतमनुत्तमं वसानाः।
अवशा घननिद्रया निपेतुर्गजभग्ना इव कर्णिकारशाखाः ॥ ५१ ॥

अवलम्ब्य गवाक्षपार्श्वमन्या शयिता चापविभुग्नगात्रयष्टिः।
विरराज विलम्बिचारुहारा रचिता तोरणशालभञ्जिकेव ॥ ५२ ॥

मणिकुण्डलदष्टपत्रलेखं मुखपद्मं विनतं तथापरस्याः ।
शतपत्रमिवार्धवक्रनाडं स्थितकारण्डवघट्टितं चकाशे ॥ ५३ ॥
अपराः शयिता यथोपविष्टाः स्तनभारैरवनम्यमानगात्राः।
उपगुह्य परस्परं विरेजुर् भुजपाशैस्तपनीयपारिहार्यैः ॥ ५४ ॥

महतीं परिवादिनीं च काचिद्वनितालिङ्ग्य सखीमिव प्रसुप्ता।
विजुघूर्ण चलत्सुवर्णसूत्रा वदनेनाकुलकर्णिकोज्ज्वलेन ॥ ५५ ॥

पणवं युवतिर्भुजांसदेशादवविस्रंसितचारुपाशमन्या।

---

148. तथापरा J तथा पुरा C **150.** घननिद्रया J वत निद्रया C **154.** °वक्र° J °चक्र° C **155.** अवनम्यमान° J अवमन्यमान° C **158.** °सूत्रा J °सूत्रां C **158.** °कर्णिकोज्ज्वलेन C °योक्त्रकेण J

---

